 ISSN 976-8645

# वेदशास्त्रे श्रीहर्षस्य पाण्डित्यम्

डा.साधनकुमारपात्रः

द्वादशशतकस्य विख्यातकविः श्रीहर्षः 'नैषधचरितमि'ति महाकाव्यं विरचितवान् । अनेन महाकविना निषधराजेन नलेन सह विदर्भराजकन्यायाः दमयन्त्याः प्रेमकथामुपजीव्य द्वाविंशतिसर्गस्थैः २८२७ श्लोकैः निर्मितमिदं महाकाव्यम् ।" नैषधं विद्वदौषधम् "– विद्वज्जनानामज्ञानान्धकार-व्याधिनिरामयस्य औषधमिति प्रवादवाक्यं प्रसिद्धमस्ति । स्वीयकाव्यस्य महत्त्वविषये महाकविः श्रीहर्षः विशेषतया अवहित आसीत् । तदेव कविकण्ठेण ध्वन्यते --

" यत् काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः

श्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियम् ॥ (नै. च. २२/१५३)

अविदुषः अरसिकजनस्य च समीपे नैषधचरितस्य समादरो नास्ति , केवलमेव विदग्धैः काव्यरसरसिकैः अस्य रस आस्वाद्यते । अनुरूपः श्लोकः दृश्यते भट्टिकवेः रावणवधमहाकाव्ये --

" व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम् ।

हता दुर्मेधसश्चास्मिन् विदुषां प्रीतये मया ॥ (भट्टिकाव्यम् -२२/३४)

सदृशार्थकः श्लोको भामहविरचिते काव्यालंकारेऽपि परिदृश्यते --

" काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत् ।

उत्सवः सुधियामेव हन्त दुर्मेधसो हताः ॥" (काव्यालंकारः - २/२०)

कालिदासोत्तरयुगे यदा श्रीहर्षः आविर्भूतोऽभवत् तदा पाण्डित्यप्रदर्शनेन विचारितं भवति स्म कविश्रेष्ठत्वम् । काव्यशास्त्रानुसारेण 'नैपुण्यं' काव्यरचनायाः अन्यतमं कारणम् । विविधशास्त्रानुशीलनात् कविः नैपुण्यमिदमर्जयति । श्रीहर्षेण विरचिते नैषधचरिते महाकाव्ये वेद- वेदाङ्ग - उपनिषद् - रामायण - महाभारत - पुराण - दर्शन - अर्थशास्त्र- धर्मशास्त्र - कामशास्त्र - संगीतविद्या - नाट्यशास्त्र - धनुर्विद्या - शरीरविद्यादिषु एतस्य कवेः असाधारणं पाण्डित्यमुपलभ्यते । केवलमेवात्र वेदशास्त्रे कवेर्पाण्डित्यं यथासाध्यं पर्यालोच्यते ।

वेदशास्त्रेषु महाकवेः श्रीहर्षस्य असाधारणव्युत्पत्तिः परिदृश्यते । महाकाव्यस्य प्रथमे सर्गे कविना चतुर्दशानां विद्यानां चतस्रो दशाः उल्लिखिताः --

"अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।

चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम्॥ (नै.च. १/४)

वेदाश्चत्वारः षड्वेदाङ्गानि मीमांसा न्यायविस्तरः धर्मशास्त्रं पुराणञ्चेति चतुर्दश विद्या उक्ताः । अस्याः चतुर्दशविद्यायाः चतस्रो दशाः यथा -- अध्ययनं तथा गुरुमुखात् श्रवणं, अर्थावगतिः, तदर्थानुष्ठानं, अध्यापनं वा शिष्येभ्यः प्रतिपादनञ्चेति । महाभाष्यकारेण पतञ्जलिना तदीये पस्पशाह्निकग्रन्थे चतस्रो दशाः उल्लिखिताः । यथा -- " चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति - आगमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेनेति ॥" (पस्पशाह्निकम् - ३६ ) चतुर्दशविद्याभिः सह आयुर्वेदो धनुर्वेदो गान्धर्ववेदो अर्थशास्त्रञ्च मिलित्वा अष्टादशविद्या भवन्ति ।

पुरा किल देवराजेन इन्द्रेण पर्वतानां पक्षेषु छिद्यमानेषु मैनाको नाम हिमाचलपुत्रः पलायितो भूत्वा समुद्रे निममज्जेतीति पौराणिकी वार्ता ऋक्संहितायां परिदृश्यते । कविलेखन्यां सुकौशलेन इयं वार्ता उपस्थापिता -- " निमज्य मैनाकमहीभृतः सतस्ततान पक्षान् धुवतः सपक्षताम् ॥"(नै. च. १/११६ ) । ऋग्वेदे अघमर्षणमन्त्रः --

ऋतं च सत्यं चाभीद्धात् तपसोऽध्यजायत ।

ततो रात्र्यजायत ततः समुद्रोऽर्णवः ॥

समुद्रादर्णवादधि संवत्सरोऽजायत ।

अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।

दिवं च पृथिवीं चाऽन्तरिक्षमथो स्वः ॥ ( ऋग्वेदः १०/१९०)

अश्वमेधयज्ञाङ्गभूतस्य अवभृथ-स्नानस्य सर्वपापनाशकः मन्त्रोऽयम् उल्लिखितः पञ्चमसर्गस्य अष्टादशसंख्याके श्लोके --

" तद्विमृज्य मम संशयशिल्पि स्फीतमत्र विषये सहसाघम् ।

भूयताम् भगवतः श्रुतिसारैरद्य वाग्भिरघमर्षणऋग्भिः ॥

ऋग्वेदे उल्लिखितम् अस्ति यत् इन्द्रेण शम्वरोऽयं निहत: । महाभारते तत्परवर्तिकाव्ये च शम्बरः कामदेवस्य शत्रुः । हरिवंशानुसारे कामदेवेन निहतः सः । नैषधचरिते षष्ठसर्गे कथेयं दृश्यते --

अनादिसर्गस्रजि वानुभूता चित्रेषु व भीमसुता नलेन ।

जातैव यदा जितशम्बरस्य सा शाम्बरीशिल्पमलक्षि दिक्षु॥ (नै. च. ६/१४)

लोकप्रचलिताभिचारक्रियायाः अलौकिकप्रयासार्थं अथर्ववेदस्य अपरं नाम काष्र्ण्यवेदः । महाकाव्ये अस्य उल्लेखोऽस्ति --

" आसीदथर्वा त्रिवलित्रिवेदीमूलाद्विनिर्गत्य वितायमाना ।

नानाभिचारोचितमेचकश्रीः श्रुतिर्यदीयोदररोमरेखा ॥ (नै. च. १०/७५)

वेदशास्त्रे पुत्रलाभार्थं पुत्रेष्टियागः विहितः । एकदा वृत्रासुरस्य जन्मनः प्राक् पित्रा पुत्रेष्टियागः अनुष्ठितः । तत्र यागकाले तेन मन्त्रः प्रोक्तः ' इन्द्रशत्रुवर्धस्व ' । तथाऽपि दुर्भाग्यवशात् उच्चारणवैकल्येन इन्द्रः अभवत् वृत्रस्य घातकः । "श्येनयागः"- शत्रुवधाय अभिचारक्रियारूपेण श्येनयागः विहितः ' श्येनेनाभिचरण् यजेत् ' । वृष्टिकामाय कारीरीष्टियागः विहितः । ' कारीरिं निर्वपेद् वृष्टिकामः' इति यागस्य विधानम् । इमे पुत्रेष्टियाग- श्येनयाग-कारीरीष्टियागाः उल्लिखिताः कविना महाकाव्ये --

" पुत्रेष्टिश्येनकारीरिमुखा दृष्टफला ।

न वः किं धर्मसन्देहमन्देहजयभानवः ॥ " (नै. च. - १७/९४)

वेदमन्त्रस्य मूलरूपं अविकृतरक्षणार्थम् ऋषिभिः संहितापाठ-क्रमपाठ-जटापाठ-इत्यादयः उद्भाविताः । यथा - संहितापाठः दृश्यते - " ओषधयः संवदन्ते सोमेन सह राज्ञा --- " ( ऋक्संहिता १०/९७/२२) । अस्य क्रमपाठः दृश्यते - " ओषधयः सं/सं वदन्ते/वदन्ते सोमेन/सोमेन सह/सह राज्ञा/राज्ञेति । क्रमपाठस्य उल्लेखः दृश्यते नैषधचरिते (१७/१६४) । सौत्रामणी-यागे ब्राह्मणानां मद्यपानं विहितम् । 'सौत्रामण्यां सोमग्रहान् सुराग्रहांश्च गृह्णन्ति ' । अयं सौत्रामणी-यागः पशुयागः । आद्ये भवति अश्विन्-देवतायै छागेन च सरस्वती-इन्द्रदेवताभ्यां च मेषाभ्यां प्रयोजनम् । द्वितीये च भवति पञ्च पशुभिः प्रयोजनम् । सौत्रामणी-यागस्य परिचयः लभ्यते नैषधचरिते १७/१८२ श्लोके प्राप्यते । पाशुपतव्रतः (१७/३९), विवाहे कूटसाक्षी दारुणाग्निः (१७/१२९), सर्पमेधयज्ञः (१७/१९६), महाव्रतयागः (१७/२०३), अश्वमेधयज्ञः (१७/२०४), उदात्तस्वरः (१९/७), अग्निहोत्रयज्ञः (१९/४४), पुरुषसूक्तं (२१/४१), विष्णुसूक्तं (२१/४८) प्रभृतिभ्यः उल्लेखेभ्यः निःसन्देहं प्रमाणितमिदं यत् वेदशास्त्रे कविः असाधारणः पण्डितो आसीत् ।

नैषधचरिते बहुषु स्थलेषु वेदाङ्गस्य परिचयः उपलभ्यते । षड्वेदाङ्गेषु अन्यतमा शिक्षा वेदस्य ध्वनिविज्ञानम् । कल्पे वैदिकयागानुष्ठानस्य प्रक्रिया संक्षिप्तरूपेण विवृता । वैदिकमन्त्रस्य अर्थज्ञानार्थं निरुक्तं गुरुत्वपूर्णं वेदाङ्गम् । महाकाव्ये शिक्षा कल्पः निरुक्तं च उल्लिखिताः कविना १६/३० इति संख्याके श्लोके नैषधस्य वर्तते। चतुर्थवेदाङ्गं छन्दः द्विधा विभज्यते - जातिछन्दः वृत्तछन्दश्चेति । अस्य छन्दसः परिचयोऽस्ति दशमसर्गे ७७ संख्याके श्लोके । व्याकरणशास्त्रेऽपि कवेः पाण्डित्यमासीत् । यथा --

असंशयं सा गुणदीर्घभावकृतां दधाना विततिं यदीया ।

विधायिका शब्दपरम्पराणां किं चारचि व्याकरणेन काञ्ची॥ (नै.च. १०/७८)

व्याकरणे गुणस्य दीर्घस्य च विधानं वर्तते । " आद्गुणः "(६/१/८७) " अकः सवर्णे दीर्घः "(६/१/१०१) [अष्टाध्यायी] । सम्भवतः विततिमिति पदेन कविः सम्प्रसारणसंज्ञां प्रति इङ्गितं करोति । " इको यणचि "(६/१/७७- अष्टाध्यायी ) । यदा स्वयंवरसभायां नलस्थाने देवराजः इन्द्रः नलरूपं धृत्वा उपावसत् तथापि नलस्य इव अकपटस्वभावः इन्द्रस्य नासीत् वस्तुतः व्याकरणस्य परिभाषायां विषयोऽयम् ' स्थानिवद्भाव ' इति उच्यते । व्याकरणे स्थानिवद्भावस्य पाणिनिसूत्रं " स्थानिवदादेशोऽनल्विधौ "(१/१/५६) इति वर्तते।

‘ अस्तेर्भूः ’ इत्यनेन पाणिनिसूत्रेण लुङ्-विभक्तौ अस्-धातोः रूपाणि भू-धातुः इव अभूदादीनि भवन्ति । अनुरूपमेव संसारस्य प्राणिवर्गाः मर्त्यलोकवासिनः भूत्वापि विश्वनाथस्य वाराणस्यां अमरत्वं लभन्ते ( ११/११७ ) इति व्यञ्जनया अस्य तात्पर्यम् उल्लिख्यते । एतद्भिन्नं तु-स्थाने हि-स्थाने च ‘ तातङ् ’ इत्यस्य उल्लेखः, घु-संज्ञायाः उल्लेखश्च ( १९/६० ) दृश्येते । “ तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् ”( पाणिनिः - ७/१/३५ ), “ दाधाघ्वदाप् ”( पाणिनिः - १/१/२० ) । ज्योतिषशास्त्रेऽपि कवेः विद्वत्त्वम् आसीत् । अत्र ( १०/७९ ) कविना नक्षत्रराशिः अलंकारस्य मणिराशिरूपेण कल्प्यते । यदा पूर्वराशौ पराशौ मध्यराशौ च क्रमानुसारेण वृहस्पतिः शुक्रः चन्द्रश्च अवस्थिताः भवन्ति तदा दुरुधरामहायोगः इति जायते । ज्योतिश्शास्त्रस्य विषयोऽयं दमयन्त्याः रूपवर्णनायां सुन्दरभावेन कविना प्रयुक्तः ( १५/४२ ) ।

नैषधचरितस्योपरि अनया सीमितया समीक्षया वेदशास्त्रे महाकवेः श्रीहर्षस्य पाण्डित्यमत्र यथासाध्यमालोचितम् । महाकाव्यमिदं श्रीहर्षस्य विविधशास्त्रनिष्णातातायाः परिचयम् आवहति । विविधशास्त्रस्य ईदृशं सन्निवेशं कृत्वा साहित्यजगति श्रीहर्षः विशिष्टस्थानमेकमधिकरोति । भावपक्षात् कलापक्षस्याधिक्यम्, शास्त्रीयसन्दर्भस्य प्रयोगातिशयः, क्लिष्टकल्पनायाः बाहुल्यम्, गूढं लम्बायमानं वर्णनम्, अप्रचलितस्य नवनिर्मितस्य शब्दस्य च प्रयोगश्च नैषधचरिते दृश्यते । तेन कारणेन प्रगाढं पाण्डित्यं विना रचनायाः मर्मोद्धारः दुष्कर एव प्रतिभाति । महाकाव्ये जटिलग्रन्थिविन्यासप्रसङ्गः इति कविना स्वयमेव उद्घुष्टम् --

“ ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया ।

प्राज्ञम्मन्यमना हठेन पठिती मास्मिन् खलः खेलतु ॥”(नै. च. २२/१५२)

विदग्धजनानां समीपे श्रीहर्षस्य काव्योक्तिः सुधारूपेण प्रतिभाति । तदेव कवेरभिलाषः -- “ मदुक्तिश्चेदन्तर्मदयति सुधीभूयः सुधियः ”( नै. च. २२/१५० ) । अपि च प्रवादवाक्यमिदं नैषधचरितस्य श्रेष्ठतां प्रतिपादयति --

“ तावद्भा भारवेर्भाति यावन्माघस्य नोदयः ।

उदिते नैषधे काव्ये क्व माघः क्व च भारविः ॥

---


**Bibliography**

1. Ācārya, Nārāyana(Ed.), *Naiṣadhacarita of Śrīharṣa*, Bombay : Nirṇayasāgar Press, 1952.
2. Kara, Gaṅgādhara(Ed.), *Mahābhāṣya of Patañjali* (Paspasāhnika), Kolkata : Sanskrit Book Depot, 2002.
3. Dāsa, Karuṇāsindhu(Ed.), *SaṃskṛtaSāhityasambhāra* (CaturdaśaKhaṇḍa ), Kolkata : NavapatraPrakāśana, 1982.
4.Viswabandhu (ed.), Atharbavedasaṃhit*ā (with Sāyaṇabhāsya), Hosiyārpur, 1960-64*
5. Max Muller (ed.), Rgvedasaṃhit*ā (with Sāyaṇabhāsya), Bārāṇasī*, 1965
6. Śarmā, Śivadatta(Ed.), *Naiṣadhacarita of Śrīharṣa*, Bombay, 1912.
7. Siddhāntavāgīśa, Haridāsa(Ed.), *Naiṣadhacarita of Śrīharṣa*(1-11), Nakipur, 1849.
8. Siddhāntavāgīśa, Haridāsa(Ed.), *Naiṣadhacarita of Śrīharṣa*(12-22), Kolkata, 1871.

**English Books :**

1. Bandyopadhyay, Pratap, *Observation on Similes in the Naiṣadhacarita*, Calcutta, 1966 .
2. Dasgupta, S.N. and De, S. K., *A History of Sanskrit Literature*, University of Calcutta, rpt.1977 .
4. Handiqui, KrisnaKanta, *Naiṣadhacarita of Śrīharṣa*, Poona, 1956.
5. Jani, ArunodayNatwarlal, *A Critical Study of ŚrīharṣasNaiṣadhīyacarita*, Boroda : Oriental institute, 1957.


--o--